# Rajarshivasukritam Pundarikakshaparam Stotram

# રાજર્ષિવસુકૃતં પુણ્ડરીકાક્ષપારં સ્તોત્રમ્

## Document Information

Text title : Rajarshivasukritam Pundarikakshaparam Stotram

File name : rAjarShivasukRRitaMpuNDarIkAkShapAraMstotram.itx

Category : vishhnu, vishnu, stotra, varAhapurANa

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : varAhapurANa | adhyAya 6/10-17||

Latest update : September 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2024

*sanskritdocuments.org*

# રાજર્ષિવસુકૃતં પુણ્ડરીકાક્ષપારં સ્તોત્રમ્

રાજર્ષિર્વસુરુવાચ ।
નમસ્તે પુણ્ડરીકાક્ષ નમસ્તે મધુસૂદન ।
નમસ્તે સર્વલોકેશ નમસ્તે તિગ્મચક્રિણે ॥ ૧૦॥

વિશ્વમૂર્તિં મહાબાહું વરદં સર્વતેજસમ્ ।
નમામિ પુણ્ડરીકાક્ષં વિદ્યાઽવિદ્યાત્મકં વિભુમ્ ॥ ૧૧॥

આદિદેવં મહાદેવં વેદવેદાઙ્ગપારગમ્ ।
ગમ્ભીરં સર્વદેવાનાં નમામિ મધુસૂદનમ્ ॥ ૧૨॥

વિશ્વમૂર્તિં મહામૂર્તિં વિદ્યામૂર્તિં ત્રિમૂર્તિકમ્ ।
કવચં સર્વદેવાનાં નમસ્યે વારિજેક્ષણમ્ ॥ ૧૩॥

સહસ્રશીર્ષિણં દેવં સહસ્રાક્ષં મહાભુજમ્ ।
જગત્સંવ્યાપ્ય તિષ્ઠન્તં નમસ્યે પરમેશ્વરમ્ ॥ ૧૪॥

શરણ્યં શરણં દેવં વિષ્ણું જિષ્ણું સનાતનમ્ ।
નીલમેઘપ્રતીકાશં નમસ્યે ચક્રપાણિનમ્ ॥ ૧૫॥

શુદ્ધં સર્વગતં નિત્યં વ્યોમરૂપં સનાતનમ્ ।
ભાવાભાવવિનિર્મુક્તં નમસ્યે સર્વગં હરિમ્ ॥ ૧૬॥

નાન્યત્કિઞ્ચિત્ પ્રપશ્યામિ વ્યતિરિક્તં ત્વયાઽચ્યુત ।
ત્વન્મયં ચ પ્રપશ્યામિ સર્વમેતચ્ચરાચરમ્ ॥ ૧૭॥

ઇતિ વરાહપુરાણે ષષ્ઠાધ્યાયાન્તર્ગતં રાજર્ષિવસુકૃતં
પુણ્ડરીકાક્ષપારં સ્તોત્રં સમાપ્તમ્ ।

વરાહપુરાણ । અધ્યાય ૬/૧૦-૧૭॥

varAhapurANa . adhyAya 6/10-17..

Proofread by PSA Easwaran

*Rajarshivasukritam Pundarikakshaparam Stotram*

pdf was typeset on September 4, 2024

Please send corrections to *sanskrit@cheerful.com*